Shri Raghunatha Temple MSS. Library,
JAMMU

६१८८२

No. ४३-ख

Title पाणिनीय शिक्षा(टीकोपेता)

Author

Extent ७ पत्र Age सं. १८६३३

Subject शिक्षा

No ६१८८२ - ख

पाणिनीयशिक्षा[illegible]वा

॥४३॥

६१८२

F-8

पाणिनीयशिक्षाटीका
श्लो० १८० प० ७

२४ मंगलं हि तत्सद्भूतं तुरीयमद्वैतं केवलं शिवं शान्तं यदस्याग्रे च यन्मध्ये यच्चान्ते प्रतिष्ठितं तस्मादादावन्ते मध्ये च तदनुष्ठितं तत्प्रतिष्ठि
ततमं भवेति । कौतूहलाय ते मनश्चाप्यायते प्राणश्चाप्यायते तथा श्रोतारो ऽप्यहरहर्म्मोदमाना अपहतपाप्मानो भवंति बलमोजो धृतिं

॥ श्रीगणाधिपतये नमः ॥ रुद्रपंकमलपत्राक्षं नत्वा भक्त्या रत्सलं पाणिनीयमते शिक्षा तस्या व्याख्या वितन्यते १ अथ शिक्षां प्रवक्ष्यामि अथ गाथ शब्दो
आनंतर्ये अनुवंगतो मंगलार्थश्च वर्तते । वेदाध्ययनानंतरं अंगपाठस्य विहितत्वात् तथा च महाभाष्ये ब्राह्मणेन निष्कारणो धर्मः
षडंगो वेदोऽध्येयो ज्ञेयश्चेति निष्कारणमिति प्रयोजनमनपेक्ष्येत्यर्थः तेषु च शिक्षा प्रथमा शिक्षायानंतरं कल्प एवो ध्येयः नान्यानीति
संबंध = अन्यादौ अनुबन्धचतुष्टयं वक्तव्यं तच्च संबंधाधिकारी प्रयोजन विषयरूपं तत्र चायमेव संबंधो यद् ग्रंथांगिभावः नित्यसंबं
धाभिहितं ग्रंथिनः अविधेयं तु स्वयमेव पाणिनिर्वक्ष्यति वाचउच्चारणे विधिमित्यादिना ॥ प्रयोजनं तु वर्णानां सम्यगुच्चा
रणं प्रयोजनमपि भाष्ये श्रूयते ॥ एकोऽपि वर्णः सम्यक्प्रयुक्तः स्वर्गे लोके कामधुग्भवतीति शिक्षेत्तेव वर्णोच्चारणमनयास्य
शिक्षां तां प्रकर्षेण वक्ष्यामि कथयिष्यामीत्यर्थः ॥ पाणिनीयं मतं यथा ॥ पाणिनीयमिति तस्येदमित्यर्थे निर्देशो वृद्धाच्छ इ
ति सूत्रेण छप्रत्ययः । मतमिति मनज्ञाने धातु पाणिनीयं मतं ज्ञानं यथा भवति तथा निरूपयिष्यामि तेरेव शत्रुवारैरेतस्मिन्न परि
शिष्टभाषया अचोऽस्पृष्टा यणस्त्वीषन्नेमस्पृष्टाः शरः स्मृता इत्यादि अणुदित सवर्णस्य चाप्रत्ययः इति च कण्ठ्यावहाविचु

वीर्यं चाहितं कीर्ति आयुष्यमारोग्यं चादिनकं ति अपतरं हि मत्युं प्रमह साधुर्ज्ञ्या चानुवर्तंति ॥
२४ = २

स्वी = १

प्रयोजनं=तच्छ्वदेन=८

तथाऽन्यत्रऽप्यवर्तुत्युक्तमेतेनैव तद्व्याकरणादवगंतव्यं ॥ मोनुस्वार इति ॥ नेनु व्याकरणे शब्दचिंता शिक्षायामपि सैव तथा च
१ | व्याकरणेनैव गतार्थत्वात् शिक्षाप्यपार्थी इति चेत् सत्यं गोशब्दः सासनादिमत्यर्थे साधुरिति व्याकरणे चिंत्यते मे शिक्षायां तु
गोशब्दः जिह्वामूलेनोच्चारयितव्य इति मे शिक्षा पार्थी शिक्षा ॥ शास्त्रानुपूर्वं तद्विद्यात् ॥ शास्त्रमिति शास धातोकरणे ष्ट्रन्प्रत्ययः
मतस्य=४ आनुपूर्वमिति गुरुपूर्वकक्रम पाणिनीयं परामर्शः पाणिनीयमेतस्य यदानुपूर्व्यं यो गुरुपूर्वकक्रम स एवास्येत्यर्थः
तथा च सम्यमेवग्रंथकृत वक्ष्यति ॥ शंकरः शांकरीं प्रादाद्दाक्षीपुत्राय धीमते इति ॥ यथोक्तं लोकवेदयोः ॥ लोके वेदे च समाना
र्थत्व इत्यर्थः ॥ तथा चोक्तं भाष्ये ॥ य एव लौकिकाः शब्दास्त एव वैदिकास्त एव तेषामर्थी इति ॥ ननु स्वस्वस्थानेनैव अकारा
दयो वर्णाः सर्वैरप्युच्चार्यंत एव परस्थानस्य निराकांक्षत्वात् पुनरपि शिक्षा पार्थेत्याशंक्याह ॥ प्रसिद्धमपि शब्दार्थमविज्ञात
मबुद्धिभिरिति ॥ अबुद्धिभिरिति बुद्धिहीनैर्मूर्खैः प्रसिद्धमपि शब्दार्थं अविज्ञातं संतं पुनः प्रव्यक्तं व्याक्ति करिष्यामि स्पष्टिकरिष्या
मीत्यर्थः ॥ किंच काचोच्चारणे विधिं वाचो गिरः उच्चारणे उच्चारणे विधिं विधानं स्पष्टिकरिष्यामि ॥ ननु विधिरत्यंतमप्राप्तौ नियमः पा

ऽरजातबुद्धिभि=२

स्थिति चेत् यथाप्रज्ञानुसारेण विवरणोक्ति=६

तथा वागात्म्यं ताप्राप्तेरभावात् उक्तं चाधस्तात् अकारादयो वर्णाः स्वस्वस्थाने नैवोच्चारयंते इति ॥ अत्रोच्यते यद्यपि स्थानभिद्यताउ
च्चार्यंते तथाप्युपाङ्गांशः कथनीयो ग्रहणादिः पदार्थो विधिशब्दः ॥ कतिसंख्याका ते वर्णा येषां गोच्चारणं क्रियते इत्यत आह ॥ त्रिष
ष्टिश्चतुःषष्टिर्वा वर्णाः शंभुमते मताः ॥ शंभवत इति शंभूतेः सकाशात् मता ज्ञाता इत्यर्थः वर्णा ह्येते यथोक्तं लोकवेदयोरित्युक्तं
तत्र लोके किं संस्कृतविषया एव वर्णा उत सर्वभाषाविषया इत्याह ॥ प्राकृते संस्कृते चापि ॥ अपिशब्दात् अपभ्रंशादिष्वप्येकवर्णा संभूते
नीताः संतः स्वयंप्रोक्ताः स्वयंभुवा ब्रह्मणा स्वयमेवादरेण प्रकर्षेण चारिताः कथं त्रिषष्टिः कथं वा चतुःषष्टिरित्याशंक्याह ॥ स्वरा
विंशतिरेकश्च ॥ स्वरशब्दो वतापयोः । स्वर्यते शब्द्यते व्यंजनमिति नेनेति करणे अच्प्रत्ययः कथं ते एकविंशतिः अ इ उ ऋ ऌ
एते चत्वारः ह्रस्वदीर्घप्लुतसंभेदेन द्वादश संख्याकाः संपन्नाः ॥ ऌकारस्य दीर्घादयो न संतीति स्मरणात् ह्रस्व एवोपदिश्यते स्वरा=६
ऌकारमेलनेन त्रयोदशसंख्याका जाता । ए ऐ ओ औ संध्यक्षराणि । संध्यक्षराणां ह्रस्वा न संतीति स्मरणात् दीर्घप्लुता एवं नूहं
ते त एते अष्टौ पूर्वैस्त्रयोदशभिः सह मिलिता एकविंशतिः २१ ॥ स्पर्शानां पंचविंशतिः ॥ कादयो मावसाना स्पर्शाः जिह्वा
मूलतालुमूर्द्धदंतोष्ठा पर स्पर्शैः स्पर्शैरभिनिष्पत्त्या आविर्भवंतीति स्पर्शाः पूर्वैकविंशत्या सह षट्चत्वारिंशत् ४६

याद्यश्च स्पृष्टा यत्र चैयकारादयः अष्ट संख्याका भवंति यरलव शषसह इति तेषां मध्ये आद्यानां चतुर्णामन्तस्थसंज्ञा बोध्या उपरि

तनानां चतुर्णां मूष्माण इति संज्ञा बोध्या पूर्वसंख्यया षट्चत्वारिंशत्संख्यया सह चतुष्पञ्चाशत्संख्या बोध्या ५४ ॥ चत्वारश्च यमास्स्मृ

2 ताः ॥ सू॰ ॥ यमकुतीति यमः स्वयमेवोपरमतीत्यर्थः केते यमाः । लोके कुं खुं गुं घुमिति अनन्त्यश्च भवेत्पूर्वो ह्यन्तश्च परतो यदि तत्र

मध्ये यमस्तिष्ठेत्सवर्णः पूर्ववर्णयोः वर्गान्त्यात् शषसेभ्यश्च अन्तस्थैर्वापि संयुतात् इष्यमाणा निवर्तते आदेशिकमिवाध्वगा इति

"नारदोऽप्येवं जिह्व्या मते यमो वर्णागम इति विधीयते" असमाख्याताश्चत्वारश्च यमास्स्मृता इति वर्णान्तरत्वेनोपदेशीय संयोग

रा= शास्त्रात् ॥ अथ चतुर्णामुदाहरणानि भवति प्रकृत्या अग्निरिति यमो ङकारनकारा इति अन्येतु यमं वर्णांतरमिति मन्यंते

"तथा च शौनकः" स्पर्शा यमाननुनासिका स्वरात्परे अनुनासिका स्वरात्परे स्पर्शेषु अनुनासिकेष्विति पूर्वोक्ति चतुः पंचाश

द्भिस्सह अष्टपंचाशत्संख्या बोध्या ५८ ॥ सू॰ ॥ अनुस्वारो विसर्गश्च ॥ स्वरं अनुभवतीत्यनुस्वारः चकारानुमागमानुस्वारोऽपि

दंत्यमूलस्य स्वराननु इति विसर्ग इति विविधं सृज्यते त्यज्यते इति विसर्गः ॥ मू॰ ॥ कफाभ्यां चापि परासे ते इति ॥ ककार पकारौ

[illegible]

शि॰ वृ॰ २

पि=४

अ=१

ग्रंथकार उपदिष्टात्त्वयमेववक्ष्यति ॥ योगवाहा विज्ञेया आश्रयस्थानभागिन इति ॥ अपरोपिपाठः । कपावपि परौ स्थितौ
अनुस्वारविसर्गयोः पराइत्यर्थः ॥ अन्योपिपाठः ॥ कपौ चापि पराश्रितौ ॥ ककारपकारौ तदाश्रयस्थानं ययोस्तौ कपाश्रयौ ।
चशब्दादनुस्वारविसर्जनीयाइति पराश्रयौ ॥ मू० ॥ दुस्पृष्टो ऌ इति विज्ञेयो ऌकारः प्लुत एव च ॥ दुष्पृष्ट इत्यनेन ईषत्स्पृष्टवर्णधर्मे
नवर्णान्तरं इति च वक्ष्यति । अचोऽस्पृष्टा यणस्त्वीषदिति तथाचोद्धृजः ॥ स्पृष्टं करणं स्पर्शानां दुष्पृष्टमन्तस्थानामिति । पराभक्तिश्च ऌ
कारो विद्यते अतएव ऌकार दुष्पृष्टधर्मवान् चशब्देन ऌकारोपि बोध्यः ॥ इतिशब्दः श्लोकपादपूरणार्थः । ऌकार इति । ~~ऌकारस्य~~
~~[illegible]~~ ॥ प्लुत एव चेति ॥ ऌकारस्य दीर्घाद्योनसंतीत्यधस्तात्परमतमुक्त्वा स्वमतमाह । ऌकारः प्लुत एव चेति । त्रिमात्रः
चकारेण ह्रस्वोपि ॥ ननु वर्णानां प्रयत्नाश्चाग्रे वक्ष्यंते अत्र प्रयत्नविचारेण्यर्थः उच्यते प्लुतविधानार्थं तावत् ऌकार उच्चारयितव्यः
उच्चारिते च ऌकारे तावत्स्वार्थं प्रयत्न उच्चारितः दुस्पृष्टश्चेति पाठांतरात् ननु अनुस्वारद्वयं कथं [illegible] ह्रस्वदीर्घप्लुतभेदेनेति ब्रूमः
उ अनुस्वारादयः प्लुतांताश्च पूर्वैरष्टपञ्चाशद्भिः सह त्रिषष्टिः । चतुष्षष्टिः कथं । अनुस्वारो विसर्गश्चेति दुज्ञोपि ॥ अनुस्वारो द्वेधा भि
त्यनुस्वारो ह्रस्वदीर्घौ दीर्घह्रस्व इति । एवं चतुःषष्टिसंख्यासंपन्नाः ॥ अथ वर्णसंख्यावबोधानंतरं चिंत्यते ॥ एषामु वर्णानामुच्चारयिता कः

कथं चोच्चारयति उच्चारऐ ऋमस्वकः
इत्यतआह ॥

ऌवर्णोच्चारप्रत्य=
=येजातेऌकार इ
तिसिद्धं=

॥मू०॥ आत्मा बुद्ध्या समेत्यार्थान् मनो युंक्ते विवक्षया ॥ ननु कथं शरीरं द्रियं यु ति दिक्क आत्मा । उच्यते । इच्छा यु ति दिक्को भवति प्रयोजकत्वात् । बुद्ध्यादीति निकर्ष प्रयोज्यानि करणत्वात् कुठारवत् इति न्यायात् शरीरं द्रियं यु ति दिक्क आत्मा सिद्धः ॥ कथमुच्चारयति केन क्रमे
णेति प्रश्नद्वयस्योत्तरमाह । स आत्मा बुद्ध्या अर्थान् स्वान् समेत्य सम्यगवगम्य अर्थप्रत्यायनाय यः शब्द उच्चार्यते मनो युङ्क्ते विवक्षया
तच्च मनो नियुक्तं सत् आत्मा बुद्ध्या अर्थान् स्वान् सम्यगवगम्य ॥ मू० मनः कायाग्निमाहंति ॥ तच्च मनो प्रेरितः सन् कायाग्नि
माहंति शरीराग्निं आभिमुख्येनाहंति ॥ मू० स प्रेरयति मारुतं ॥ सोऽग्निः प्रेरितः सन् मारुतं वायुं प्रेरयति (स वायुः प्रेरितः सन्)॥
मू०॥ मारुतस्तूरसि चरन् मन्द्रं जनयति स्वरम् ॥ अग्निप्रेरितः वायुः उरसि चरन् सन् मंद्रं स्वरं निष्पादयति ॥ मन्द्र क्रुष्टस्तु
मंद्र इति ॥ मू० प्रातः सवनयोगं तं छन्दो गायत्रमाश्रितं ॥ प्रातः सवनेन योगो अस्येति प्रातःसवनयोगः । गायत्रं छंदो आश्रया
यः ॥ गायत्रं गायते आच्छादना छन्दः ॥ मू० कण्ठे माध्यन्दिनयुगं मध्यमं त्रैष्टुभानुगं ॥ मारुत इत्यनुवर्तते सवनं छन्दश्च
चरन् वर्णान् जनयति कण्ठे चरन् वायुर्मध्यमं स्वरं जनयति । कण्ठे भवं प्रत्यये कृते कण्ठ इति सिद्धं ॥ मध्यमं युनक्तीति माध्य
न्दिनं सवनमार्जितं त्रैष्टुभ छंदो गामिनं ॥ तारं तार्तीयसवनं शीर्षण्यं जागतानुगं ॥ तार्तीयसवनमिति तृतीयसवनभाजं

... मुच रतं मनो नियुंक्ते तदा इच्छा को प लोभ मोह दम्भा न ... पर सूचना संख्य

3

यथा जायमानस्य जंतोः त्रयं (?) क्रियोभिर्येच्चार्थैर्नु चेष्टा इत्येते सहजा धर्माः एवं = ४

जागतं छन्दोनुगामिनं जागतं छन्दोनुगच्छति इति जागतानुगः शीर्षण्य इति शीर्षं छन्दसीति सूत्रेण शिरः शब्दस्य स्थाने शीर्षन् स्यादे भाव (?) शः तत्र भवः शीर्षण्यः ॥ मू० सोदीर्णो मूर्ध्न्यभिहतो वक्त्रमापद्य मारुतः वर्णान् जनयते ॥ सः कायाग्निप्रेरितो वायुः उदीर्णः ऊर्ध्वं गतः सन् मूर्धानं याभवत् तदुपरि गतिं तेना मलभमानः शिरः कपालेनावरुद्धत्वात् पुनः प्रत्यावृत्य वक्त्रमापद्य वा वर्णानुत्पादयति सोदीर्ण ॥ इत्यनेनैव मारुतस्य प्रतिपत्तौ पुनर्मारुतग्रहणं विस्पष्टप्रतिपत्त्यर्थं ॥ तेषां विभागः पंचधा स्मृतः इति मूलं ॥ तेषां जन्यमानानां वर्णानां विभागः विवेकः पंचधा पंचप्रकारकाः ॥ संख्याया विधार्थे धा ॥ अनेन धा प्रत्ययः स्मृत इत्यस्य अनुगत इत्यर्थः ते षां वर्णानां पंचधा विवेकः कैः कारणैर्भवतीत्याह ॥ मू० ॥ स्वरतः कालतः स्थानात् प्रयत्नानुप्रदानतः ॥ स्वस्थानहेतुं व्याख्यास्यामः ॥ मू० ॥ इति वर्णविदः प्राहुर्निपुणं तन्निबोधत ॥ वर्णज्ञाता आचार्याः वर्णानां विवेकः पंचधा आहुः तेषां वर्णानां पंचधा विवेकं निपुणमुच्यमानं भो शिष्याः निबोधत ॥ एतत् ॥ उदात्तश्चानुदात्तश्च स्वरितश्च स्वरास्त्रयः ह्रस्वो दीर्घः प्लुत इति कालतो नियमाश्चि इति मूलः ॥ स्वरतः हेतून् श्लोकेन विवृणोति कालत इति स्वरउदात्तादिः कालो मात्रप्रभृति त्रिमात्र पर्यंतः । उदात्त इत्युपलक्षणं (?) स्वरा स्वतो वा राजंते रंजंति वा ह्रस्वो ह्रस्व इत्युच्यते दीर्घो दीर्घः । प्लवनात् प्लुतः यथा स्थितस्य स्याल्लघो भवंति एवं स्वराणामपि बोधः ॥ = २५ =

तृतीयं पादमाचार्य आह निपुणं तन्निबोधतेति । = ३

[illegible]

स्वरित इत्यन्तिस्वरांतरं न स्वर इत्यनेन स्वरितोऽन्त्यास्तु: अत्रेनिष्वाद्युदात्तानुदात्तविकारः ॥ नारदोप्याह ॥ उच्चादुच्चतरं नास्ति नीचान्नीचतरं तथा
गैस्वर्यस्वरसंज्ञायां किं स्थानं स्वर उच्यते उच्चनीचस्ययोर्मध्ये साधारण इति श्रुतिः ॥ तस्वरं स्वरसंज्ञायां प्रतिजानंति शिक्षकाः
त्रयः स्वरा इति त्रय एव स्वरा ऋग्वेदे पंच यजुर्वेदे सप्त सामवेदे एकमात्रो ह्रस्वः द्विमात्रो दीर्घः त्रिमात्रः प्लुतः विषममागास्या दि
त्यो ह्रद्विजः ॥ नारदोप्याह ॥ निमेषः कालमात्रा स्याद्विद्युत्कालेति चापरे तः इति शब्दः प्रकारे अनेन प्रकारेण कालतो हेतोः स्वरितः स्यात्
विषय एव विभाषा नियमः ॥ नारदोप्याह ॥ स्वर उच्चः स्वरो नीचः स्वरः स्वरित एव च यं जनान्वगवर्त्तते तत्रतिष्ठति स स्वर इति स्थानतद्
ति यदुक्तं तदाह ॥ मू० ॥ कंठ्यावहाविचुयशास्तालव्या ओष्ठजावुपू ॥ स्थाने कंठ्यादि कंठ्यावहाविति अकार हकारौ कंठ्यौ
कंठ्यावुभौ यत्नौ इचुयशास्तालव्याः इकार चवर्गौ यकार शकारौ चैते तालव्याः तालुस्थानादुत्पन्ना उकारानुनं घोवर्ग
स्तावपश्चि वर्गादावन्यत्रापि चुटु इत्येवमादिषु तथाप्युक्तं पाणिनिरप्याह । अणुदित्सवर्णस्य चाप्रत्यय इति ओष्ठजावि
रपि ॥ स्पर्शवर्गस्य स्पर्शान्तहलेन ज्ञेयवर्गास्य च हले । स्थाने पदिकार इति ओष्ठजाउपू उकारः पूशब्देन पवर्गः

अकारः शब्दनित्यमात्रापि जां उकारो
ह्रस्वतन्मात्रेणैव स्वकार स्वतन्त्रमात्रगी
स्वकारोऽनेपतन्मात्रदीर्घम् ततो वाग्यक
पंचम्लुत इति । शब्द इति वर्णस्यैव
मात्रा ॥ =

= ति कि ति कि ति कि

ऐकार औकारश्च द्वावपि कंठोष्ठे ते =५

मू०। स्युर्मूर्द्धन्या ऋटुरषा ॥ ऋकारश्च टवर्गश्च रेफषकारौ च एतेषां मूर्धन्यस्थानं ॥ मू०॥ दंत्या लृतुलसा स्मृताः ॥ लृकारश्च तवर्गश्च
लकारसकारौ एते वर्णा दंतेषु भवाः ॥ मू०। जिह्वामूले तु कु प्रोक्ता प्रोक्ता ॥ कवर्गस्य जिह्वामूलीयं स्थानं बोध्यं ॥ मू०। दंत्योष्ठ्यो वः स्मृ-
तो बुधैः ॥ वकारो दंत्योष्ठ्यः तै दंतैस्य ओष्ठाभ्यां च जात इति विद्वद्भिः स्मर्यते ॥ ए ऐ तु कंठतालव्यौ इति मू०। एकार ऐकारौ
कंठतालव्योरुत्पन्नौ ॥ मू०। ओ औ तु कंठोष्ठजौ स्मृतौ ॥ ओकार औकारयोः कंठोष्ठस्थानं बोध्यं ॥ मू०। अर्धमात्रा तु कंठस्यादेकार
ऐकारयोर्भवेत् ॥ अर्धमात्रा कंठस्य भवति ऐकारस्य ~~ऐकारस्य~~ च औकारस्य च संवृतत्वान्न्याहकत्वात् अत एव तु एभिर्द्विसंध्यक्षराणि च अर्ध
मात्रासंबंधनी भवेत् अर्धार्धं तु स्वे स्वे स्थाने ॥ मू०। अयोगवाहा विज्ञेया आश्रयस्थानभागिनः। अयोगवाहा इति शब्देन अनुस्वा
रादयश्चत्वारः। अनुस्वार विसर्गश्च ≍क ≍पौ च ॥ ओदत्र जिरपि ॥ तथायोगवाहः अः इति विसर्जनीयः ≍क इति जिह्वामूलीयः
≍प इत्युपध्मानीयः अं इत्यनुस्वारो नुनासिकः । इत्ययोगवाहः ॥ न विद्यते योगः संयोगः वर्णैस्तैरेण सह येषां ते अयोगवाहाः। आश्र
यस्थानभागिन इति । ककारादेः आश्रयस्य स्थानं भजंति एवं शीला ये ते आश्रयः स्थानभागिनः कथ्यंते अन्येतु यमानपि अ* यो

गवाहान्मन्यंते तेषां मते अयोगवाह
शब्दो न यशास्त्रसिद्धि रूढिशब्दश्च वर्ण
वद्देहितयाः अनुस्वारस्य स्वरूपं मोनुस्वा
र इति सूत्रं वहतः सूगकमेव दर्शितं ॥

॥ मू॰ ॥ अलाबुवीणानिर्घोषो दंत्यमूल्यस्वरानुगः अनुस्वारः प्रकर्तव्यो नित्यं ह्रोः शषसेषु च ॥ अलाबुवीणानिर्घोष इति ॥ अलाबु तुंबः
तस्य वीणा तस्या निर्घोषः शब्दः यस्यासौ अलाबुवीणानिर्घोषः दंतमूले भवं दंत्यमूल्यं स्थानं ॥ मू॰ । अष्टौ स्थानानि वर्णानामुरः
कंठः शिरस्तथा जिह्वामूलं च दंताश्च नासिकोष्ठौ च तालु च ॥ पूर्वोक्तानां स्थानानामनुवादस्वरूपमिदं । स्वरतः कालतः स्थानतो वर्णानां भेदो निरू-
पितः अधुना प्रयत्नभेदः निरूप्यते ॥ प्रकृष्टो यत्नः प्रयत्नः प्रकर्षेण यत्नः उच्चारणं प्रति अष्टादशभिः प्रकारैः सप्रयत्नः ॥ मू॰ । अचोऽस्पृ-
ष्टा यणस्त्वीषन्नेमःस्पृष्टाः शलस्तथा ॥ अजिति प्रत्याहारग्रहणं ॥ अइउऋऌएओऐऔ एते अच् संज्ञकाः अस्पृष्टाः कथ्यंते ।
ईषद् = यणिति प्रत्याहारः यरलव एते ईषत्स्पृष्टाः । शलिति प्रत्याहारः शषस एते नेमस्पृष्टाः । नेमशब्दः सर्वादिगणे स चार्द्धार्थे वर्तते तेन अ-
र्धस्पृष्टा इत्यर्थः । शरस्तथेत्यत्र अयं पादपूरणे ॥ मू॰ । शेषाः स्पृष्टा हलः प्रोक्ता ॥ हलिति प्रत्याहारः । हकारादारभ्य लकाररूपर्यंतं
५ शिष्यते परिशिष्यते इति शेषाः उपयुक्ता दन्या इत्यर्थः । ति यणः शरश्च ईषदस्पृष्टाः तदुद्वरिता हलः स्पृष्टाः स्वस्थाने कथिताः
॥ मू॰ । निबोधानुप्रदानतः ॥ अनुप्रदानमिति स्वस्थानादिकं घोषादिकं च अनुप्रकर्षेण दीयते इति अनुप्रदानं ॥ औदव्रजिरपि नादानुप्रदान
इत्यौदव्रजि ॥ अनुप्रदानहेतौ वर्णानां भेदं शृणुत ॥ मू॰ । यमोऽनुनासिका न ह्रौ नादिनो हझषः स्मृताः ॥ यमिति प्रत्याहारः अनुना-

नासिका इति सर्वे रधिकाराणीं ए
पाठादनुनासिकाश्चं ईति अनुनासि
काः ॥ ञमङणनम् अनुनासिका
ज्ञानीक्तार ॥

शा॰ ५

हकारो रुपश्च नादिनः ऊषऊभघढधष = ३

अहणं कषऊषघढ ... ऊधष = १

पाणिनिरप्याह । मुखनासिकावचनोनुनासिक इति । अर्ह इति अकारो रेफ हकारौ शाषसश्च प्रत्याहारः ॥ एतेऽकारा
दयो नादिनः स्मर्यन्ते । नादएषामस्तीति नादिनः ॥ पाठांतरमाह । अमोनुनासिका न हौ । अमिति प्रत्याहारः ॥ एते अनुनासि
का । न हो न तु रेफ हकारौ अप्येवाद्य संतौ नादिनो हरूपाः स्मृताः ॥ अस्माच्च पाठद्वयात् आसां रेफवर्जितानां विकल्पेनानुनासि
कत्वं । शौनकोप्याह । स चाद्योपाविहिताधिरत्नयः प्लुतोऽपि धानानुनासिकोपधाद्विति तथा उकार स्वेति करणेन युक्तो अपृक्तो
राधितः शाकलेनेति । अकार पूर्वे रेफयोः प्रथमपाठे द्वितीयपाठे हकाररेफयोरनुनासिकत्व प्रतिषेधः ॥ मू । ईषन्नादा यणो
यश्च । यणः कथिता वैश्यसँस्क सँकारादाः शकारे एप्रत्याहृताः जवगडदशर एतेयणो यशाश्च ईषद्मनां नादः ॥ मू । स्वासिन क
एकादयः । खकादय इति खफछठथाः एते स्वासिनः स्वासः एषामस्तीति स्वासिनः स्वासघोषा एते तृतीया प्रथमा नाम
घोषश्च तुर्याणां युग्माः शौष्मा एड इति चौदूब्रजी ॥ ईषच्छ्वासाश्चरो विद्यात् इति मू । चर इति प्रत्याहारः ॥ एतान् मनाक् स्वा
सान् जानीयात् ॥ मू । गोधामैतत्स्य चवते । गोर्वाचो धामस्थानं ॥ अत्र धामशब्देन स्थानं गच्छते । एतच्छास्त्रं आचक्षते वर्णविदः

गोरर्थस्य निगमनादित्यर्थः = १ अहणं चटतकपशषसर = २

अहउ ऋलृ एऐ ओऔ हयवरट लण ञमङणन मञौ = २

जं =

तपस्विने समाहृत्येति । समाहारस्तु बीजवत् बीजं हि यथा पृथिव्यां सुप्तं तपसायुक्तं रसेन सिक्तं वायुनावर्द्धितं केनचिद्दंष्ट्रोनांकुरतां लभते केनचित्पर्णतां केनचित्स्कन्धतां केनचित्पुष्पतां फलस्य चांतरगतं बीजस्य चां-
तरगतं एतेभ्यादिति बीजस्य बीजत्व एवं चैकेन बीजेन सम्युक्तातेन सर्वमुक्तं भवति तथास्य पावादेवी त्रैकुदिता पल्लविता पुष्पिता तपस्विने फलिता विताविता चतदेतस्याः मूलं विदितं सर्वं विदितं भवति एतत्

ब्रह्मचर्येण तपसा विद्यया मू. । शंकरः शांकरीं प्रादाद्दक्षपुत्राय धीमते ॥ शंकरः सुखकरः शिवः शांकरीं सुखकरीं विद्यां दक्षपुत्राय

श्रद्धया गुरुतपसा त्याच
वेदितस्य मू.० = २

दाक्षि नामिका काचित् ऋषि कन्या तत्पुत्राय प्रादात् दत्तवान् धीमते बुद्धिमते ॥ संप्रतिपाणिनिस्तुतिपरं श्लोकमाह । येना
क्षर समाम्नायमधिगम्य महेश्वरात् कृत्स्नं व्याकरणं प्रोक्तं तस्मै पाणिनये नमः २ न च प्रकृते स्तुतिपूर्वकं पाणिनेर्नमस्कार
करणं किमर्थमुच्यते ॥ अचोऽस्पृष्टा यणस्त्वीषदित्यादि प्रत्याहारैः प्रिशाक्षार्थे तैः प्रत्याहाराश्च पाणिनिना शंकरादधिगम्य
व्याकरणं प्रोक्तं । प्रिशाक्षोपकारश्च प्रत्याहारा लोके प्रवर्तिताः अतोऽस्मिन्युक्ता स्तुतिः । अक्षरसमाम्नाय इति प्रत्याहारान्नाहुः । कृ

ई = ६

त्स्नमिति । ब्राह्मं वा सैत्यं ऐन्द्रं चान्द्रं आर्षं चेति । येन धौता गिरः पुंसां विमलैः शब्दवारिभिः तमश्चाज्ञानजं भिन्नं तस्मै पाणि
नये नमः ३ ॥ पुंसां जीवानां विमलैर्गुणवद्भिः गुणश्च सौगंध्यमाधुर्यमारोग्यं हैमयं लघुत्वं स्थैर्यं चोच्यते विमलपानीति वा धौताः कल्याणगुणाः कृताः
यतः कल्याणशब्दः प्रयुक्तं ब्रह्मराजते प्रयोक्ता च भ्राजमानो भवति देवतासंप्रयोगात्महदाभ्युदयं चाप्नोति इति शब्दप्रशंसा अथार्थेनार्थप्रशंसामाह ।
(तमश्चाज्ञानजं भिन्नं) तमश्चेति । यथोद्यता भास्करेण निशाकृतं तमः संभृतसंभारा निशा चापनीयते तथा च विद्योद्भूतं दुःखजालं संभृतसंभारा
सा च येनापनीयते तस्मै नमः ॥ मू. ॥ त्रिनयनमभिमुखमेनिसृताभित्यादि श्लोकेन साक्षात्स्तुतिमाह । त्रिनयनमुखादिति यथा गुहायाः सिंहो निष्क्रामति तथा
तस्मै भगवद्वरुणरूपिणे ऋषये द्रष्ट्रे सिद्धेन मस्कुर्मः तथा च श्रुतिः ॥ शन्नो मित्रः शं वरुणः शन्नो भवत्वर्यमा शन्न इन्द्रो बृहस्पतिः शन्नो

निर्मलैः कुमुदैः शुभ्रैः ... [illegible]

[illegible]

[illegible]

अतुलं = पवित्रपाणिः आचार्यवान् यो वा इमां कल्याणीं वाचं देवीं अहरहः अधीते स इह यामानं हित्वा महता श्रयेण संयुज्यते यशस्वी धनी वर्चस्वी भवति सत्या
युष्मान् भवति वर्तमाने देहे मोक्षं ऐहिकसुखं लभते स्वर्गादिसुखं च परिमितकालात् तोलयं तु उश्नुते मोक्षाख्यं सुखं अपरिमितकाले अपरिच्छिन्नरूपं सुखं भिक्त
७ शुभम्॥ समाप्तम्॥ सं॰ १९३२ ज्ये॰ शु॰ २८॥ श्रीशिक्षाव्याख्या समाप्ता॥ शुभम्॥ श्रीशारदायै नमः॥ श्रीरामाय नमः श्रीकृष्णाय नमः

श्रीव

8

नं ६५